श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीवेदान्तदेशिक यतीन्द्र महादेशिकैरनुगृहीता

# ॥ श्री लक्ष्मीनृसिंहप्रपत्तिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीनृसिंहप्रपत्तिः ॥

यस्याभवद्भक्तजनार्तिहन्तुः
　　पितृत्वमन्येष्वविचार्य तूर्णम्।
स्तम्भेऽवतारस्तमनन्यलभ्यं
　　लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ 1 ॥

श्रीतापनीयेऽप्रतिमप्रभावम्
　　श्रीतैत्तिरीयेकुचरोगिरीष्ठः।
इतीव पक्षीन्द्रधराधरस्त्वं
　　लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ 2 ॥

संवर्ग विद्या विलसत्स्वरूपं
　　स्तम्भैकडिम्भात्मलसत्प्रभावम्।
त्रैलोक्यसम्पूर्णनृसिंहमूर्तिं
　　लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ 3 ॥

हिरण्यदातारमपीन्द्रहेतोः
　　हिरण्यहन्तारमथाष्टबाहुम्।
शान्तं सताम् उग्रम् असत्समाजे
　　लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ 4 ॥

सन्तोषहासेन सदारमायां
　　व्यान्ताननं स्वर्ण सटाभिरामम्।
जिह्वाधरन्यस्त रमेक्षणान्तं
　　लक्ष्मीनृसिंहं शरणं प्रपद्ये ॥ 5 ॥

सञ्चारयोग्यां च पदावहन्तं
श्रीपादुकां चेञ्चुसुतां रमां च।
सव्येन हस्तेन परिष्वजन्तं
लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ 6 ॥

श्रीमद् द्वयार्थो ह्यहमेव सत्यम्
इतीव सर्वान् प्रतिबोधयन्तम्।
रमानृसिंहन्त्वविभक्तरूपं
लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ 7 ॥

श्रीवेङ्कटेशेन विवाहकाले
सम्पूजितं सर्वविधोपचारैः।
श्रीशङ्खचक्राभयबाहुदीप्तं
लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ 8 ॥

अहोबिलं सानुज एत्य रामः
रमाहरेर्यस्य चकार पूजाम्।
पद्यैश्च पञ्चामृत भोग्यशब्दैः
लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ 9 ॥

समाश्रयार्थन्त्वपराधिवर्गे
समागते तत्र निवृत्तवक्त्रम्।
श्रीवाक्यसन्तुष्ट कृपार्द्रनेत्रं
लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ 10 ॥

सञ्चारयोग्यं प्रसमीक्ष्यकालं
काले कलौ यस्त्वरयाऽभ्यषिञ्चत्।
श्रीवासनामानमहो मुनीन्द्रं
लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ 11 ॥

समाश्रितानामिह सेवनार्थम्
    अहोबिलेह्यद्यमठे ज्वलन्तम्।
सुवर्णडोलाविलसत्स्वरूपं
    लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ **12** ॥

श्रीवण्शठारातियतीन्द्र पूर्वैः
    स्थानेऽभिषिक्तैर्यतिराजचन्द्रैः।
सम्पूजितं ह्यात्मदमात्मदानां
    लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ **13** ॥

अहोबिले गारुडशैलमध्ये
    कृपावशात् कल्पित सन्निधानम्।
लक्ष्म्या समालिङ्गितवामभागं
    लक्ष्मीनृसिंहं शरणं प्रपद्ये॥ **14** ॥

लक्ष्मीनृसिंहार्चन हृष्टचित्तः
    भक्त्यैव वेदान्तगुरुर्यतीन्द्रः।
लक्ष्मीनृसिंहस्य शुभां प्रपत्तिं
    चक्रे जनानां निखिलार्थसिद्ध्यै॥ **15** ॥

॥ इति श्री लक्ष्मीनृसिंहप्रपत्तिः समाप्ता॥